www.sgbauonline.com

AU–2321

# M.A. (Part—I) (Semester—II) Examination

## SANSKRIT

## Paper—VIII

## (Literature and Aesthetics)

समयः — होरात्रयम्] [परीक्षाङ्काः — 80

**सूचना :—** निर्देशाभावे उत्तराणि स्वीकृतभाषयैव लिखत।

**(शुकनासोपदेशः)**

1. (अ) **एकस्य** प्रश्नस्य उत्तरं विस्तरेण लिखत — 10

(1) "वाणी बाणो बभूव ह।" इत्येतत् वाक्यं शुकनासोपदेशस्य आधारेण स्पष्टीकुरुत।

(2) शुकनासेन चन्द्रापीडाय कः उपदेशः कृतः ? किमर्थञ्च।

(ब) टिप्पण्यौ लिखत — 6

(1) यौवनारम्भः

(2) चन्द्रापीडः

(3) शुकनासोपदेशे कृदन्तरूपाणि

(4) लक्ष्म्याः चञ्चलता।

2. (अ) **द्वयोः** वाक्ययोः ससन्दर्भस्पष्टीकरणं कुरुत — 10

(1) अविनयानामेकैकमप्येषामायतनम्, किमुत समवायः।

(2) गन्धर्वनगरलेखेव पश्यत एव नश्यति।

(3) तृष्णाविषमूर्च्छिताः कनकमयमिव सर्वं पश्यन्ति।

(4) भवद्गुणसन्तोषो मामेवं मुखरीकृतवान्।

(ब) **एकस्य** गद्यांशस्य अनुवादं लिखित — 6

(1) तदेवंप्रायातिकुटिल-कष्ट-चेष्टा-सहस्रदारुणे राज्यतन्त्रे, अस्मिन् महामोहकारिणि च यौवने, कुमार ! तथा प्रयतेथा यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, नोपालभ्यसे सुहृद्भिः, न शोच्यसे विद्वद्भिः। यथा च न प्रकाश्यसे विटैः, न प्रहस्यसे कुशलैः, नास्वाद्यसे भुजङ्गैः, नावलुप्यसे सेवकवृन्दैः।



www.sgbauonline.com

www.sgbauonline.com

(2) अपगतमले हि मनसि स्फटिकमणविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणा:। गुरुवचनम्अमलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य। इतरस्य तु करिण इव शङ्खाभरणमाननशोभासमुदयमधिकतरमुपजनयति। हरत्यतिमलिनमन्धकारमिव दोषजातं प्रदोषसम्यनिशाकर इव। गुरुपदेश: प्रशमहेतुर्वय: परिणाम इव पलितरूपेण शिरसिजजालमलीकुर्वन् गुणरूपेण तदेव परिणमयति।

(काव्यप्रकाश:)

3. (अ) श्लोकद्वयस्य सविवरणमनुवादं कुरुत — 10

(1) शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे।।

(2) काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्य: परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।

(3) ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया।।

(4) य: कौमारहर: स एव हि वरस्ता एव चैत्रक्षपा:।
ते चोन्मीलितमालतीसुरभय: प्रौढा: कदम्बानिला:।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ।
रेवारोधसि वेतसीतरुतले चेत: समुत्कण्ठते।।

(ब) ब्रह्मसृष्टे: अपेक्षया कविसृष्टे: महत्वं प्रतिपादयत। 6

अथवा

काव्यप्रकारान् विशदीकुरुत।

(नाट्यशास्त्रम्)

4. (अ) टिप्पण्यौ लिखत — 10

(1) विश्वकर्मा

(2) जर्जरध्वज:

(3) नाट्यवृत्तय:

(4) पञ्चमवेद:।

(ब) भरतमुनीम् अनुसृत्य नाट्यगृहस्य वर्णनं कुरुत। 6

अथवा

नाट्यशास्त्रस्य प्रथमाध्याये वर्णितं नाट्यस्वरूपं स्पष्टीकुरुत।



www.sgbauonline.com

www.sgbauonline.com

5. सुयोग्यं पर्यायं विचिनुत (केऽपि **षोडश**) — 16

(1) काव्यशास्त्रे कति सम्प्रदायाः प्राप्यन्ते ?

(अ) षट् (ब) सप्त

(क) एकादश (ड) शताधिकाः

(2) रससम्प्रदायस्य प्रवर्तकः आचार्यः कः ?

(अ) विश्वनाथः (ब) भरतमुनिः

(क) मम्मटः (ड) वामनः

(3) भामहस्य काव्यशास्त्रीयग्रन्थविशेषः —

(अ) काव्यमीमांसा (ब) काव्यादर्शः

(क) काव्यकौतुकम् (ड) काव्यालङ्कारः

(4) 'वक्रोक्तिः काव्यजीवितम्।' परिभाषेयं कस्य विद्यते ?

(अ) वामनस्य (ब) कुन्तकस्य

(क) आनन्दवर्धनस्य (ड) रूद्रटस्य

(5) कोऽप्येकः रसः नास्ति —

(अ) वीरः (ब) शृङ्गारः

(क) भयानकः (ड) उत्साहः

(6) आस्वादंकुरकन्दोऽसौ भावः —

(अ) रसः (ब) अनुभावः

(क) स्थायिभावः (ड) विभावः

(7) हासः कस्य स्थायिभावः ?

(अ) वीरस्य (ब) अद्भूतस्य

(क) हास्यस्य (ड) शान्तस्य

(8) रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं —

(अ) रतिः (ब) शोकः

(क) जुगुप्सा (ड) भयम्

(9) श्यामवर्णो विष्णुदैवतः उत्तमप्रकृतिप्रायो रसः ?

(अ) वीरः (ब) करूणः

(क) शृङ्गारः (ड) शान्तः

(10) वीररसस्य वर्णः ?

(अ) शृङ्गारः (ब) हेमवर्णः

(क) रक्तवर्णः (ड) शुभ्रवर्णः



www.sgbauonline.com

www.sgbauonline.com

(11) अभिनेयार्थः इत्येषः प्रकारः केन सूचितः ?

(अ) जगन्नाथेन (ब) दण्डिना

(क) मम्मटेन (ड) भामहेन

(12) वक्राभिधेयशब्दोक्तिरिष्टा वाचामलंकृतिः। इति कस्योक्तिः ?

(अ) भामहस्य (ब) विश्वनाथस्य

(क) आनंदवर्धनस्य (ड) भरतमुनेः

(13) भामहानुसारेण वक्रोक्तिः ________ ।

(अ) नाट्यालङ्कारः (ब) रसवत् अलङ्कारः

(क) काव्यालङ्कारः (ड) मूलाङ्कारः

(14) भिन्नं द्विधा स्वभावोक्तिः वक्रोक्तिश्चेति वाङ्मयम्। इति कस्य उक्तिः ?

(अ) दण्डिनः (ब) भामहस्य

(क) कुंतकस्य (ड) क्षेमेन्द्रस्य

(15) उद्भटस्य कृतिः का ?

(अ) काव्यालङ्कारः (ब) काव्यालङ्कारसूत्राणि

(क) काव्यालङ्कारसारम् (ड) काव्यालङ्कारसारसंग्रहः

(16) कुन्तकस्य कालः कः ?

(अ) ख्रिस्ताब्दस्य 925 तः 1025 पर्यन्तम् (ब) ख्रिस्ताब्दस्य 825 तः 925 पर्यन्तम्

(क) ख्रिस्ताब्दस्य 425 तः 525 पर्यन्तम् (ड) अनिश्चितम्

(17) पदादिवाक्परिस्पन्दसारः साहित्यमुच्यते। इत्येषा साहित्यस्य व्याख्या केन कृता ?

(अ) आनंदवर्धनेन (ब) कुन्तकेन

(क) क्षेमेन्द्रेण (ड) मम्मटेन

(18) वक्रोक्तिजीविते वस्तुवक्रता नाम ध्वन्यालोके ________ ।

(अ) अलंकारवक्रता (ब) प्रबंधव्यंजकता

(क) पदव्यंजकता (ड) वस्तुध्वनिः

(19) कविस्वभावनिबन्धनत्वेन काव्यप्रस्थानभेदः समंजसतां गाहते। इत्येतत् विधानं केन सम्बद्धम् ?

(अ) मार्गेण (ब) अलङ्कारेण

(क) औचित्येन (ड) रसेण

(20) उद्भटः कस्य विवरणकारः ?

(अ) दण्डिनः (ब) भामहस्य

(क) रुद्रटस्य (ड) कुन्तकस्य



www.sgbauonline.com